- Title – ग्रहषिपूजनम्
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 12 / २४
- Lines-
- Size
- Substance Paper –
- Script Devanagari ✓
- Language – संस्कृत
- Period –
- Beginning – श्री गणेशायनमः। गणाधिपं नमस्कृत्य गुरुंश्च
- End – अथ ह्यतेग्निहोत्र उपतिष्ठते।
- Colophon-
- Illustrations -
- Source -
- Subject - कर्मकाण्ड
- Revisor -
- Author - अज्ञात
- Remarks- 1-12 प्राप्त है। अपूर्ण है।

अनुराधा

श्रीगणेशायनमः। गणाधिपं नमस्कृत्य गुरूंश्च कमलापतिं उत्सर्गपद्धतिं कुर्वे स्मृतिसूत्र प्रमाणतः। अथ ऋषिस्था
पनपूजन प्रकारः कथ्यते सयथा तत्रकारिका स्थापयेदृष्यरुन्धतीं प्रवरांश्च ततोधीमान् कुर्यातेषां प्रतिष्ठितिं कारि
कार्थः स्थापयेदृष्यरुन्धतीमित्यत्र तत्रेत्यनुवर्त्ततेतस्मिन्कर्म्मणि अरुन्धतिसहितान्सप्तऋषीन् स्वप्रवरांश्च कुशमयान्कृत्वा
स्थापयेत् यदाऋष्यरुन्धतीतिपाठस्तदासमाहारद्वन्द्वैकवद्भावः ततश्च नपुंसकत्वादीकारस्य ह्रस्वताच यदाऋष्यरुन्धति
मितिपाठस्तदाऋषिभिः सहिता अरुन्धतीतिसमासः कुर्यात्तेषां प्रतिष्ठितिमिति प्रतिष्ठितिमितिपाठेस्त्रियांक्तिन् यदा
प्रतिष्ठितमितिपाठस्तदाभावेक्तः ततः स्थापनोत्तरन्तेषां गोतमादीनां सप्तर्षीणां मनोजूतिरितिमन्त्रेण प्रतिष्ठांकुर्या
दित्यर्थः तथाचरेणुकारिका प्रतिष्ठाप्यमनोजूतिरितिमन्त्रमुच्चरन् इमावेवेतियजुषानामान्येषां विनिर्दिशेदिति
कारिकार्थः स्थापनोत्तरं गोतमादि सप्तर्षीणामिमामेवेति यजुषा नामसङ्कीर्त्तयेदित्यर्थः इमावेवेत्यत्रोक्ता एव पूजनी
याः गोतमादीनित्युदाहृतवाक्यात् अथ ऋषिस्थापनक्रमः कर्तापूर्वंत्रिभिस्त्रिभिर्दर्भपवित्रैः पृथक् पृथक् गायत्रीं

2

अथ ऋषिपूजनं प्रारभ्यते ।

ऋ० पू तामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञठं समिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामोंप्रतिष्ठ ॥ १ ॥
॥२॥ अरुन्धतीसहिताः सप्तऋषयः सुप्रतिष्ठिताभवं त्वित्युक्त्वार्याक्षतान्प्रक्षिपेत् ॥ एवं प्रतिष्ठाप्य सप्तर्षय इदंविष्णु
र्विचक्रमे इति मन्त्राभ्यां षोड़शोपचारैः सप्तर्षीनर्च्चयेत् ॥ तत्र कारिका अद्भिस्तान् स्नापयेद्विप्रान् सप्तऋषय
इत्यृचा ॥ अर्घस्तेभ्यः प्रदातव्यः पूजनं चन्दनादिभिः ॥ १ ॥ नैवेद्यैर्विविधैः पूज्यावेदसंहित मिच्छता ॥ ऋषी
णां प्रीतये दद्यादुपवीतान्यनेकशः ॥ २ ॥ प्रणम्य च मुनीन् भक्त्यातर्पणञ्च समारभेत् ॥ ३ ॥ कारिकार्थः अद्भि
स्तानिति तीर्थोदकैस्तान्विष्णुरूपान् सप्तर्षीन् स्नापयेदित्यर्थः ॥ तथा रेणुकारिका ॥ मन्त्राभ्यां सप्तऋषय इदं
विष्णुर्विचक्रमे ॥ अर्च्चयेद्विष्णुरूपांस्तान् गन्धाद्यैसोपवीतकैरिति ॥ अर्घस्तेभ्य इति वेदसंहितमिच्छतापुंसाते
भ्यः सप्तर्षिभ्यः अष्टांगोर्घः प्रदातव्यः गन्धादिभिरुपचारैस्ते पूज्याः वहुप्रकारै नैंवेद्यै स्ते प्रीणनीयाः ऋषीणां राम
प्रीतयेदद्यादिति । ऋषीणां प्रीत्यर्थं वहूनि ब्रह्मसूत्राणि समर्पयेदित्यर्थः ॥ तथाच मदनरत्ने यज्ञोपवीतदानेन ॥२॥

पठित्वा ब्रह्मग्रन्थियुक्ताः सप्तर्षिवटवः कार्या ततः पीठेप्रागग्राः स्थापनीयाः ततश्चाचम्य प्राणायामान् कृत्वा कुश कुसुम यव जल पाणिर्देशकालौ सङ्कीर्त्याध्यायोत्सर्गकर्माङ्गत्वेन ऋषिस्थापन पूजनमहं करिष्य इति सङ्कल्पं कुर्यात् ततश्चाक्षतान् गृहीत्वा ॐ भूर्भुवः स्वः गोतममावाहयामि स्थापयामि भो गोतम इहागच्छेद तिष्ठ ॐ भूर्भुवः स्वः भरद्वाजमावाहयामि स्थापयामि भो भरद्वाज इहागच्छेह तिष्ठ ॐ भूर्भुवः स्वः विश्वामित्रमावाहयामि स्थापयामि भो विश्वामित्र इहागच्छेह तिष्ठ ॐ भूर्भुवः स्वः जमदग्निमावाहयामि स्थापयामि भो जमदग्ने इहागच्छेह तिष्ठ ॐ भूर्भुवः स्वः वसिष्ठमावाहयामि स्थापयामि भो वसिष्ठ इहागच्छेह तिष्ठ ॐ भूर्भुवः स्वः कश्यपमावाहयामि भो कश्यप इहागच्छेह तिष्ठ ॐ भूर्भुवः स्वः अत्रिमावाहयामि स्थापयामि भो अत्रे इहागच्छेह तिष्ठ ॐ भूर्भुवः स्वः अरुन्धती मायावाहयामि स्थापयामि भो अरुन्धति इहागच्छेह तिष्ठ एवं सप्तर्षीनावाह्य स्थापयित्वाऽक्षतानादाय मनोजूतिरिति मन्त्रेण प्रतिष्ठां कुर्यात् ॥ ॐ मनोजुतिरित्यस्यांगिर सोबृहस्पति ऋषिर्यजुर्विश्वेदेवा देवता ऋषि स्थापने विनियोगः। ॐ मनोजूतिर्जुष

पूजयेत्तत्रैवं प्रयोगः गोतमाय पाद्यं एवं भरद्वाजादिभ्य उपचाराः ततः समाचारात् स्वस्वप्रवरान्पञ्चोपचारैः
 पूजयेत्। ततः सप्तर्षीं स्तर्पयेत् तत्र गृह्यसूत्रं अग्निर्देवांश्छन्दांꣳसि वेदानृषीन् पुराणाचार्यान्गन्धर्वानितराचार्यां
न्संवत्सरं च सावयवं पितृनाचार्यानिति सूत्रार्थः॥ शिष्यगणैः सहाचार्यो देवादीन्तर्पयेत् तथाच कारिका देवांश्छ
न्दांसि वेदांश्च सनातनानृषींस्तथा तथापुराणाचार्यांश्च गन्धर्वानितरांस्तथा॥६॥ अहोरात्राद्दैमासांश्च मासानृ
तूंस्तथैव च। संवत्सरं सावयवं स्वान्पितृन्तर्पयेदथ॥७॥ आचार्यं तर्पणैः साङ्गमय म्मु रश्च पञ्चभिः। मन्त्रै
र्द्वाभ्यां च मूर्द्धितिमाच्छन्दस्त्रितयेन च॥८॥ एवः षोड़शभिर्मन्त्रैः सप्तर्षय एकया। चतुर्भिस्तर्पयेद्दंशैरिमावेवेत्य
नेनचेति॥९॥ कारिकार्थः वेदानिति आचार्यशिष्यादेवांश्छन्दांसीत्यादिना पितृनाचार्यानित्यं तान्सूत्रोक्तदेवां
स्तर्पयेयुरित्यर्थः अथेति सूत्रोक्त देवता तर्पणानन्तरमयंपुर इत्यादीमावेवेत्यं तेन यजुषामन्त्रोक्तदेवतास्तर्पयेयुरि राम
त्यर्थः॥ तथाच कात्यायनः॥ गोतमादीनृषीन् सप्तकृत्वादर्भमयान् पुनः। पूजयित्वा विधानेन तर्पयेद्दचमुच्चरन्नि ॥३॥

ब्रह्मवर्चस्विजायते ॥ तस्मात्तानि प्रदेयानि ब्राह्मणेभ्यो विपश्चिता ॥ नन्दिपुराणे । यज्ञोपवीतदानेन सुरेभ्यो ब्राह्मणाय वा । भवेद्विप्रश्चतुर्वेदः शुद्धधीर्नात्र संशयः ॥ प्रणम्येति प्रेम्णा मुनीन्सप्तर्षीन्नमस्कृत्य पूजनोत्तर ऋषींस्तर्पयेदित्यर्थः ॥ अथ ऋषिपूजनक्रमः समाचारात्पूजनात्पूर्वं कर्त्ता सप्तऋषय इदं विष्णुर्विचक्रम इति मन्त्राभ्यां करादिमूर्द्धपर्यन्तं देहे न्यासान् कुर्यात् ते यथा सप्तर्षय इत्यस्यादित्ययाज्ञवल्क्यावृषी सप्तऋषयो देवता जगतीछन्दः इदं विष्णुरित्यस्य मेधातिथिर्ऋषिर्विष्णुर्देवताङ्गन्यासे विनियोगः ॥ ॐ सप्तऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्रसदौ च देवौ ॥ १ ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे स्वाहा ॥ २ ॥ तथैव सप्तर्षिवत् षड्न्यासान्कुर्यात् ततः सप्तऋषय इदं विष्णुर्विचक्रम इति मन्त्राभ्यां काण्डानुसमयेन गोतमादीन् पूजयेत्तत्रैवं प्रयोगः गोतमायासनं समर्पयामि एवं पाद्यमर्घ्यमाचमनीय स्नानादिस्तुतिपाठान्तं गोतमं संपूज्य भरद्वाजादीन् पूजयेदेवमेव अथवा पदार्थानुसमयेन गोतमादीन्

मुखेन पितृतीर्थेन नामगोत्रोच्चारणपूर्वकं पित्रादीन्तर्पयेयुः जीवत्पितृकास्तु आप्रकोष्ठात् कृतापसव्यास्तिलमिश्राभिर
ङ्गिराचार्यस्य पित्रादीन्तर्पयेयुस्तत्रैवं प्रकारः गोत्रा आचार्यपितरस्तृप्यन्तु स्वधेति प्रयोगः ततो यज्ञोपवीती भूत्वा यं
पुरस्येत्यादिमन्त्रैर्मन्त्रोक्त देवतांस्तर्पयेयुः तत्रैवं प्रकारः कर्त्तापाणौ कुशतिलजलान्यादाय गोत्रा अस्मत्पितृपितामह
प्रपितामहादेवदत्त यज्ञदत्त विष्णुदत्तशर्माणः तृप्यध्वं स्वधा एवं मात्रादिभ्यः मातामहादिभ्यो दद्युः अयं पुर
आदिपञ्चानां साध्या ऋषयो यजूंषि प्राणभृतो देवताः मूर्द्धादिद्वयोर्देवा ऋषयो यजूंषि लिङ्गोक्ता देवताः एवञ्छन्द
आदिषोड़शानां परमेष्ठी ऋषिर्यजूंषि लिङ्गोक्तदेवता ऋषितर्पणे विनियोगः। सप्तऋषय इत्यस्यादित्ययाज्ञवल्क्या
दृषीसप्तऋषयो देवता जगती छंदः ऋषितर्पणे विनियोगः ॥ ॐ अयंपुरोभुवस्तस्यप्राणोभौवायनोवसन्तःप्राणायनो
गायत्रीवासन्तीगायत्र्यैगायत्रङ्गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतोरथन्तरंवसिष्ठऋषिःप्रजापतिगृहीतयात्वयाप्रा
णंगृह्णामिप्रजाभ्यः ॥ १ ॥ अयंदक्षिणाविश्वकर्मातस्यमनोवैश्वकर्मणङ्ग्रीष्मोमानसस्त्रिष्टुब्ग्रैष्मीत्रिष्टुभः स्वारꣳस्वारा

ति ऋग्ग्रहणं यजुरादीनामप्युपलक्षणार्थं अतएव कारिकाकारेण माछंद इत्यादीनि यजूंष्युक्तानि आचार्यशि 8
ष्याः स्वपित्रादीन्तर्पयेयुः तत्सूत्रं स्वांश्च तर्पयेयुरिति तथाच कारिका स्वान्पितॄंस्तर्पयेदथेति अथेत्यनन्तरं सूत्र
विहित तर्पणानन्तरमित्यर्थः आचार्यतर्पणैः साङ्गमिति देवादितर्पणैः सहाचार्यं तर्पयेत् न पूर्वतर्पणवत्पितृतर्पणो
त्तरमित्यर्थः तत आचार्यशिष्या अयं पुरइत्यादिपञ्चभिर्मूर्द्धेत्यादिद्वाभ्यां माछंद इत्यादित्रिभिरेवश्छन्द इत्यादिषोड
शभिः सप्तऋषय इत्येकया अथव्र्ठं षः समानमासांजीवीत्यादिचतुर्भिर्विंशपाठैरिमावेवेत्येकेन यजुषादेवतीर्थेन ऋषीं
स्तर्पयेयुः ततः स्वपित्रादिवीँस्तर्पयेयुः जीवत्पितृकेन देवाद्याचार्य तर्पणान्तं तर्पणं कर्त्तव्यं ततः पितृतर्पणं विहायसन्ध्यो
क्तदेवांस्तर्पयेत्॥ अथ ऋषितर्पणक्रमः कृतऋजुकुशोपग्रहः आचार्यशिष्यादेवतीर्थेनापो गृहीत्वा ऋषींस्तर्पयेयुः ॐ देवा
स्तृप्यन्ताम् छंदांसि तृप्यन्तां वेदास्तृप्यन्तां पुराणाचार्यास्तृप्यन्तां गन्धर्वास्तृप्यन्तां इतराचार्या स्तृप्यन्तां संवत् सरस्सावयव
स्तृप्यन्तां आचार्यास्तृप्यन्तां ततः प्राचीनावीती भूत्वा दक्षिणाग्रान्कुशान् धृत्वाञ्जलिनापो गृहीत्वा तिलान्प्रक्षिप्य दक्षिण

स्टृ० पू० यं॥६॥ अनड्वान्वयःपङ्क्तिश्छन्दोधेनुर्वयोजगतीच्छन्दस्त्र्यविर्वयस्त्रिष्टुप्छन्दोदित्यवाड्वयोविराट्छन्दःपञ्चाविर्व ९
॥ ५ ॥ यो गायत्रीच्छन्दस्त्रिवत्सोवयऽउष्णिक्छन्दस्तुर्य्यवाड्वयोनुष्टुप्छन्दोलोकन्ताऽइन्द्रम्॥७॥ माच्छन्दः प्रमाच्छन्दः प्रतिमा
च्छन्दोऽअस्त्रीवयश्छन्दः पंक्तिश्छन्दऽउष्णिक्छन्दोबृहतीच्छन्दोनुष्टुप्छन्दोविराट्छन्दोगायत्रीछन्दस्त्रिष्टुप्छन्दोज
गतीच्छन्दः पृथिवीच्छन्दः॥८॥ पृथिवीछन्दोन्तरिक्षञ्छन्दोद्यौश्छन्दःसमाश्छन्दोनक्षत्राणिच्छन्दोवाक्छन्दोमनश्छन्दः
कृषिश्छन्दोहिरण्यंछन्दोगौश्छन्दोजाच्छन्दोश्वश्छन्दः॥९॥ अग्निर्देवता। वातोदेवतासूर्य्योदेवताचन्द्रमादेवतावसवो
देवतारुद्रादेवतादित्यादेवतामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्देवतेन्द्रोदेवतावरुणोदेवता॥१०॥ एवश्छन्दोवरि
वश्छन्दः शम्भूश्छन्दः परिभूश्छन्दऽआच्छच्छन्दोमनश्छन्दोव्यचश्छन्दः सिन्धुश्छन्दःसमुद्रश्छन्दः सरिरंछन्दः ककुप्छ
न्दस्त्रिककुप्छन्दः काव्यंछन्दोऽअङ्कुपञ्छन्दोक्षरपंक्तिश्छन्दः पदपंक्तिछन्दोविष्टारपंक्तिछन्दः क्षुरोभ्रजश्छन्दऽआ राम
च्छच्छन्दः॥११॥ आच्छच्छन्दः। प्रच्छच्छन्दःसंयच्छन्दोवियच्छन्दोबृहच्छन्दोरथन्तरंछन्दोनिकायश्छन्दोविवधश्छन्दो ॥ ५ ॥

दं॑तर्यामोन्तर्यामात्पं॑चदशः पं॑चदशाद्बृहद्भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ॥ २ ॥ अयं पश्चाद्वि
यं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाश्चाक्षुष्यो जगती वार्षी जगत्या ऋक्सममृक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशा
द्वैरूपं जमदग्निरृषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ॥ ३ ॥ इदमुत्तरात्स्वस्तस्य श्रोत्रँ सौवँ शरच्छ्रौ
त्र्यनुष्टुप्शारद्यनुष्टुभ ऐडमैडान्मन्थी मन्थिन एकविँशऽ एकविँशाद्वैराजं विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया श्रो
त्रं गृह्णामि प्रजाभ्यः ॥ ४ ॥ इयमुपरि । मतिस्तस्यै वाङ्मात्या हेमन्तो वाच्यः पङ्क्तिर्हैमन्ती पङ्क्त्यै निधनवन्निधनवत आ
ग्रयण आग्रयणात्त्रिणवत्रयस्त्रिँशौ त्रिणवत्रयस्त्रिँशाभ्याँ शाक्वररैवते विश्वकर्म ऋषिः प्रजापतिगृहीतया त्व
या वाचं गृह्णामि प्रजाभ्यो लोकन्ताऽ इन्द्रम् ॥ ५ ॥ मूर्द्धा वयः प्रजापतिश्छन्दः क्षत्रं वयो मयन्दं छन्दो विष्टम्भो वयोधिपतिश्छ
न्दो विश्वकर्मा वयः परमेष्ठी छन्दो वस्तो वयो विवलं छन्दो वृष्णिर्वयो विशालं छन्दः पुरुषो वयस्तन्द्रं छन्दो व्याघ्रो वयोनाधृ
ष्टं छन्दः सिँहो वयश्छदिश्छन्दः पष्ठवाड्वयो बृहती छन्द उक्षा वयः ककुप्छन्द ऋषभो वयः सतोबृहती छन्दो नड्वान्व

ऋ० पू० सामप्रतिष्ठित्या ऽअन्तरिक्षऽऋषयस्त्वाप्रथमजादेवेषु दिवोमात्रयावरिम्णाप्रथन्तुविधर्त्ताचायमधिपतिश्चतेत्वासर्व्वे ॥
॥ ६ ॥ सम्विदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसादयन्तु ॥ १७ ॥ विराडसि दक्षिणादिग्रुद्रास्तेदेवाऽअधिपतयऽइन्द्रो
हेतीनांप्रतिधर्त्तापञ्चदशस्त्वास्तोमःपृथिव्या ꣳश्रयतुप्रउगमुक्थमव्यथायैस्तभ्नातुबृहत्सामप्रतिष्ठित्याऽअन्तरिक्ष
ऽऋषयस्त्वाप्रथमजादेवेषु दिवोमात्रयावरिम्णाप्रथन्तुविधर्त्ताचायमधिपतिश्चतेत्वासर्व्वे संविदानानाकस्यपृष्ठेस्वर्गेलो
केयजमानञ्चसादयन्तु ॥ १८ ॥ सम्राडसि प्रतीचीदिगादित्यास्तेदेवाऽअधिपतयोवरुणोहेतीनांप्रतिधर्त्तासप्तद
शस्त्वास्तोमःपृथि ꣳश्रयतुमरुत्वतीयमु क्थमव्यथायैस्तभ्नातुवैरूपं सामप्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्रथम
जादेवेषु दिवोमात्रयावरिम्णाप्रथन्तुविधर्त्ताचायमधिपतिश्चतेत्वासर्व्वे सम्विदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसा
दयन्तु ॥ १९ ॥ स्वराडस्युदीचीदिङ्मरुतस्तेदेवा ऽअधिपतयःसोमोहेतीनांप्रतिधर्त्तैकविंशस्त्वास्तोमःपृथिव्याꣳश्र राम
यतुनिष्केवल्यमुक्थमव्यथायैस्तभ्नातुवैराजंसामप्रतिष्ठित्याऽअन्तरिक्ष ऽऋषयस्त्वाप्रथमजादेवेषु दिवोमात्रयावरि ॥ ६ ॥

गिरश्छन्दोभ्रजश्छंदः सꣳस्तुप्छंदोऽनुष्टुप्छंदऽएवश्छंदोवरिवश्छन्दोवयश्छंदोवयस्कृच्छन्दोविष्पर्द्धाश्छंदोविशालं
छन्दश्छदिश्छंदोदूरोहणंछन्दस्तन्द्रंछन्दोऽअङ्काङ्कंछंदः॥१२॥रश्मिनासत्यायसत्यञ्जिन्वप्रेतिनाधर्मणाधर्मञ्जि
न्वान्वित्यादिवादिवञ्जिन्वसन्धिनान्तरिक्षेणान्तरिक्षञ्जिन्वप्रतिधिनापृथिव्यापृथिवीञ्जिन्वविष्टम्भेनवृष्ट्या वृष्टिञ्जिन्वप्रव
याह्नाहर्ज्जिन्वानुयारात्र्यारात्रीञ्जिन्वोशिजावसुभ्योवसूञ्जिन्वप्रकेतेनादित्येभ्यऽआदित्याञ्जिन्वतन्तुनारायः॥१३॥ तन्तु
नारायस्पोषेणरायस्पोषञ्जिन्वसꣳसर्पेणश्रुतायश्रुतञ्जिन्वैडेनौषधीभिरोषधीर्ज्जिन्वोत्तमेनतनूभिस्तनूर्ज्जिन्ववयोधसा
धीतेनाधीतञ्जिन्वाभिजितातेजसातेजोजिन्व॥१४॥प्रतिपदसिप्रतिपदेत्वानुपदस्यनुपदेत्वासम्पदसिसम्पदेत्वातेजो
सितेजसेत्वात्रिवृदसि॥१५॥त्रिवृदसि त्रिवृतेत्वाप्रवृदसिप्रवृतेत्वाविवृदसिविवृतेत्वासवृदसिसवृतेत्वाक्रमोस्याक्र
मायत्वासंक्रमोसि संक्रमायत्वोत्क्रमोस्युत्क्रमायत्वोत्क्रान्तिरस्युत्क्रान्त्यैत्वाधिपतिनोर्जोर्ज्जञ्जिन्व ॥१६॥ राज्ञ्यसिप्राची
दिग्वसवस्तेदेवाऽअधिपतयोग्निर्हेतीनाम्प्रतिधर्त्तात्रिवृत्त्वास्तोमःपृथिव्याꣳश्रयत्वाज्यमुक्थमव्यथायैस्तभ्नातुरथन्तरं

12

ऋ० पू० हेतिः सर्पाः प्रहेतिस्तेभ्योनमोऽअस्तु तेनोऽवन्तु तेनोऽमृडयन्तु तेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भे दध्मः ॥ २४ ॥ अयमुत्तरा 13
॥ ७ ॥ त्संयद्वसुस्तस्यतार्क्ष्यश्चारिष्टनेमिश्चसेनानीग्रामण्यौ ॥ विश्वाची चघृताची चाप्सरसावापोऽहेतिर्वातः प्रहेतिस्तेभ्योनमोऽ
ऽअस्तु तेनोऽवन्तु तेनोऽमृडयन्तु तेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भे दध्मः ॥ २५ ॥ अयमुपरि ॥ अयमुपर्य्यर्वाग्वसुस्तस्य सेन
जिच्चसुषेणश्चसेनानीग्रामण्यौ ॥ उर्वशी चपूर्वचित्तिश्चाप्सरसाववस्फूर्ज्जन् हेतिर्विद्युत्प्रहेतिस्तेभ्योनमोऽअस्तु तेनोऽवन्तु ते
नोऽमृडयंतु तेयंद्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भे दध्मः ॥ २६ ॥ मन्त्रोक्तास्तृप्यन्तां ॥ ॐ अथवꣳशः समानमासांजीवीपुत्रा
त्साञ्जीवीपुत्रोमाण्डूकायनेर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सोमाहित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षाय
णोवात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कुश्रेः कुश्रिर्यज्ञवचसोराजस्तम्बायनाद्यज्ञवचाराजस्तम्बायनस्तुरात्कावषेयात्तुरः
कावषेयः प्रजापतेः प्रजापतिर्ब्रह्मणोब्रह्मस्वयम्भुब्रह्मणेनमः ॥ १ ॥ वंशोक्तास्तृप्यन्तां ॥ १ ॥ अथवꣳशः समानमिदंवयꣳ राम
पौतिमाष्यात्पौतिमाष्योगौतमाद्गौतमोवात्स्याद्वात्स्योवात्स्याच्चपाराशर्य्याच्चपाराशर्य्यः सांकृत्याच्चभारद्वाजाच्चभारद्वाजश्चौ ॥ ७ ॥

म्णा प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानञ्च सादयन्तु ॥ २० ॥ अधिप
त्न्यसि बृहती दिग्विश्वे ते देवाऽअधिपतयो बृहस्पतिर्हेतीनां प्रतिधर्त्ता त्रिणवत्रयस्त्रिᳪँशौ त्वा स्तोमौ पृथिव्याᳪँ श्र
यतां वैश्वदेवाग्निमारुतेऽउक्थेऽअव्यथायै स्तभ्नीताᳪँ शाक्वररैवते सामनी प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वा प्रथमजा दे
वेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानञ्च साद
न्तु ॥ २१ ॥ अयम्पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्यौ पुञ्जिकस्थला च क्रतुस्थला चा
प्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिस्तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि त
मेषाञ्जम्भे दध्मः ॥ २२ ॥ अयन्दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्यौ मेनका च सहजन्या चाप्स
रसौ यातुधाना हेती रक्षाᳪँसि प्रहेतिस्तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे द
ध्मः ॥ २३ ॥ अयम्पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानीग्रामण्यौ प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसौ व्याघ्रा

श० पू० ष्ट्रोविश्वरूपात्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्याम॑श्विनौदधीचआथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणोदैवादथर्वादैवोमृत्योःप्राध्वꣳ सना 15
॥ ८ ॥ न्मृत्युःप्राध्वꣳसनःप्रध्वꣳसनात्प्रध्वꣳसनएकर्षेरेकर्षिर्विप्रजित्तेर्विप्रजित्तिर्व्यष्टेर्व्यष्टिःसनारोःसनारुःसनातनात्सनातनः
सनगात्सनगःपरमेष्ठिनःपरमेष्ठीब्रह्मणोब्रह्मस्वयंभुब्रह्मणेनमः ॥ वंशोक्ताऋषयस्तृप्यन्तां ॥ ४ ॥ अथवꣳशस्तदिदंवय
ꣳशौर्पणाय्याच्छौर्पणाय्योगौतमाद्गौतमोवात्स्याद्वात्स्योवात्स्याच्चपाराशर्य्याच्चपाराशर्य्यः सांकृत्याच्चभारद्वाजाच्चभारद्वाज
औदवाहेश्च शाण्डिल्याच्चशाण्डिल्योवैजवापाच्चगौतमाच्चगौतमोवैजवापायनाच्चवैष्टपुरेयाच्चवैष्टपुरेयः शाण्डिल्याच्चरौ
हिणायनाच्चरौहिणायनःशौनकाच्चजैवन्तायनाच्चरैभ्याच्चरैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्चकौण्डिन्यायनःकौण्डि
न्याभ्यांकौण्डिन्यावौर्णवाभेभ्यऔर्णवाभाःकौंडिन्यात्कौंडिन्यःकौंडिन्यात्कौंडिन्यःकौंडिन्याच्चाग्निवेश्याच ॥१॥ आग्निवे
श्यः॥ सैतवात्सैतवःपाराशर्यात्पाराशर्य्योजातूकर्ण्याज्जातूकर्ण्योभारद्वाजाद्भारद्वाजोभरद्वाजाच्चासुरायणाच्चगौतमाच्चगौ राम
तमोभारद्वाजाद्भारद्वाजोवलाकाकौशिकाद्वलाकाकौशिकःकाषायणात्काषायणः सौकरायणात्सौकरायणस्त्रैवणस्त्रैवणि ॥ ८ ॥

दवाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौतमो वैजवापायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहि
णायनाच्च रौहिणायनः शौनकाच्चात्रेयाच्च रैभ्याच्च रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्यात्कौ
ण्डिन्यः कौण्डिन्यात्कौण्डिन्यः कौंडिन्याच्चाग्निवेश्याच्च॥२॥ आग्निवेश्यः सैतवात्सैतवः पाराशर्य्यात्पाराशर्य्यो जातूकर्ण्याज्जा
तूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजो वैजवापायनाद्वैजवापायनः
कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्य्यायणात्पाराशर्य्यायणः पाराशर्य्यात्पाराशर्य्यो जातूकर्ण्याज्जा
तूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरा
सुरिर्भारद्वाजाद्भारद्वाज आत्रेयात्॥३॥ आत्रेयो मांटेर्मांटिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डि
ल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो
वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वा

बृ० पू० वात्पाराशरीपुत्रोगार्गीपुत्राद्गार्गीपुत्रः पाराशरीकौंडिनीपुत्रात्पाराशरीकौंडिनीपुत्रोगार्गीपुत्राद्गार्गीपुत्रोगार्गीपुत्राद्गा 17
॥ ८ ॥ र्गीपुत्रोवाडेयीपुत्राद्वाडेयीपुत्रोमौषिकीपुत्रान्मौषिकीपुत्रोहारिकर्णीपुत्राद्धारिकर्णीपुत्रोभारद्वाजीपुत्राद्भारद्वाजीपुत्रः पै
ङ्गीपुत्रात्पैङ्गीपुत्रः शौनकीपुत्राच्छौनकीपुत्रः ॥ १ ॥ काश्यपीबालाक्यामाठरीपुत्रात्काश्यपीबालाक्यामाठरीपुत्रः कौ
त्सीपुत्रात्कौत्सीपुत्रोबौधीपुत्राद्बौधीपुत्रः शालङ्कायनीपुत्राच्छालङ्कायनीपुत्रोवार्षगणीपुत्राद्वार्षगणीपुत्रोगौतमीपुत्राद्गौत
मीपुत्रआत्रेयीपुत्रादात्रेयीपुत्रोगौतमी पुत्राद्गौतमीपुत्रोवात्सीपुत्राद्वात्सीपुत्रोभारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रा
त्पाराशरीपुत्रोवार्कारुणीपुत्राद्वार्कारुणीपुत्रआर्तभागीपुत्रादार्तभागीपुत्रः शौङ्गीपुत्राच्छौङ्गीपुत्रः सांकृतीपुत्रात्सांकृती
पुत्रः ॥२॥ आलम्बीपुत्रादालम्बीपुत्रआलम्बायनीपुत्रादालम्बायनीपुत्रोजायन्तीपुत्राज्जायन्तीपुत्रोमांडूकायनीपुत्रान्मां
डकायनीपुत्रोमांडूकीपुत्रान्मांडूकीपुत्रः शांडिलीपुत्राच्छाण्डिलीपुत्रोराथीतरीपुत्राद्राथीतरीपुत्रः क्रौञ्चिकीपुत्राभ्यांक्रौ राम
ञ्चिकीपुत्रोवैदभृतीपुत्राद्वैदभृतीपुत्रोभालुकीपुत्राद्भालुकीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः सांजीवीपुत्रात्सांजीवीपु ॥ ८ ॥

रौपजन्धनेरौपजंधनिः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्य्यायणात्पा
राशर्यायणः पाराशर्य्यात्पाराशर्य्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरा
यणस्त्रैवणेस्त्रैवणिरौपजंधनेरौपजंधनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयात् ॥२॥ आत्रेयो माण्टेर्माण्टिर्गौतमा
द्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शांडिल्याच्छांडिल्यः कैशोर्यात्काप्यात्कैशोर्य्यः काप्यः कुमारहरितात्कुमारहरितो
गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौंडिन्यो वत्सनपातो वाभ्रवाद्वत्सनपाद्वाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादां
गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्य
ङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रजितेर्विप्र
जितिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः ३ वंशो
त्राऋषयस्तृप्यन्तां ॥ अथ वंशस्तदिदं वयं भारद्वाजीपुत्राद्भारद्वाजीपुत्रो वात्सीमांडवीपुत्राद्वात्सीमांडवीपुत्रः पाराशरीपु

18

सू० पू० महादितर्पणेष्वनधिकारएव पित्र्यञ्जीवत्पितुर्नोक्तमिति निगमवाक्यात्॥ न पित्र्यञ्जीवत्पितृकः प्रकुर्वीतकदाचनेति छन्दोगा
॥१०॥ ग्र्यमपि कात्यायनः सपितुः पितृकृत्येषु अधिकारो न विद्यते न जीवन्तमतिक्रम्यकिञ्चिद्दद्यादिति श्रुतिः पितृकृत्यानि
श्राद्धतर्पणस्वधाकारपितृदृप्त्यर्थं दानानीति व्याख्यातं जीवत्पितृकसञ्चये तथा अन्याश्चेतर इति स्वसूत्रेपि मृतपितृक
स्यैव पित्रादितर्पणं सूत्रकारेण प्रदर्शितं महानदीषु सर्वासु तीर्थेषु च गयान्ते। जीवत्पितापि कुर्वीत श्राद्धं पार्वण
धर्मवदितिवत्प्रतिप्रसवोपलब्धाते यत्र प्रतिप्रसवस्तत्र भवति॥ यथा जीवत्पितापि कुर्वीततर्पणं यमभीष्मयोरिति अन्ये
विशेषा अत्र जीवत्पितृकनिर्णये सन्ति परन्तु ग्रन्थगौरवभयान्नलिखिताः॥ एवं ऋषितर्पणं विधायाचार्यशिष्या ॐ
कारव्याहृतिपूर्वां सावित्रीं चतुःपठेयुः तत्र सूत्रं सावित्रीं चतुरनुद्रुत्येति सूत्रार्थः साचार्याः सावित्रीं चतुःपठेयुः
उत्सर्गसूत्रे सावित्रीं चतुरनुद्रुत्येतिल्यवन्तनिर्देशेन सावित्री पठनाव्यवहितकाले विरतास्मेति पठनं यद्यपि प्राप्तं तथा राम
प्युत्तरसूत्रे प्रवचनं च पूर्ववदित्युक्तोस्तत्र यथा प्रवचनं दृष्टं तथात्रकर्त्तव्यं तेन सावित्रीपठनानन्तरमेवाध्यायादीन्प्रब्रुयुस्त ॥१०॥

त्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः॥३॥ प्राश्नीपुत्रादासुरिवासिनः॥ प्राश्नीपुत्र आसुरायणादासुरायण आसुरेरासुरिर्याज्ञ
वल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणादरुण उपवेशेरुपवेशिः कुश्रेः कुश्रिर्वाजश्रवसो वाजश्रवा जिह्वावतो बाध्योगाज्जि
ह्वावान्बाध्योगोऽसिताद्वार्षगणादसितो वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रु
वेः कश्यपो नैध्रुविर्वाचो वागम्भिण्या अम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते॥
४॥ वंशोक्तानृषयस्तृप्यन्तां इमावेव गोतमभरद्वाजावयमेव गोतमोऽयं भारद्वाज इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रो
यं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोऽयं कश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नामैतद्यदत्रिरिति सर्वस्या
त्ता भवति सर्वमस्यान्नं भवति य एवं वेद॥१॥ ब्राह्मणोक्तानृषयस्तृप्यन्तां॥ आचार्यशिष्या अयं पुर इत्यादिमावेत्यन्तैर्मन्त्रब्राह्मणै
स्तर्पणं समापयेयुरिति॥ पौषमासस्य रोहिण्यामित्यत्र प्रयोगावसरे वासुदेवप्रभृतिनिबन्धकारा जीवत्पितृकस्य मातामह
हादितर्पणं लिखितवन्तस्तदसमञ्जसम्॥ वस्तुतस्तु यद्वत्पित्रादितर्पणे जीवत्पितृकस्य नाधिकारः प्रतीयते तद्वन्माता

ऋ० पू० क्रमः ॥ प्राङ्मुखोपविष्टो गुरुः ॥ ॐकारपूर्वां सावित्रीं त्रिःपठित्वा प्रत्यङ्मुखोपविष्टः शिष्येभ्यो मन्त्रब्राह्मणयोरध्या
॥११॥ यादीन् पाठयेत् ॥ शिष्यायथोक्तमध्यायादीनधीयीरन् ॥ ॐ भूर्भुवः स्वः तत्सवितु० यात् ॥ इषेत्वा ॥ १ ॥ कृ
ष्णोसि ॥ २ ॥ समिधाग्निम् ॥ ३ ॥ एदम् ॥ ४ ॥ अग्नेस्तनूः ॥ ५ ॥ देवस्यत्वा ॥ ६ ॥ वाचस्पतये ॥ ७ ॥
उपयामगृहीतोसि ॥ ८ ॥ देवसवितः ॥ ९ ॥ अपोदेवाः ॥ १० ॥ युञ्जानः प्रथमम् ॥ १ ॥ दृशानोरुक्मः ॥
१२ ॥ मयिगृह्णामि ॥ १३ ॥ ध्रुवक्षितिर्ध्रुवयोनिः ॥ १४ ॥ अग्नेजातान् ॥ १५ ॥ नमस्ते ॥ १६ ॥ अश्मन्नूर्जम्
॥ १७ ॥ वाजश्च ॥ १८ ॥ स्वादीन्त्वा ॥ १९ ॥ क्षत्रस्य योनिः ॥ २० ॥ इमम्मे ॥ २१ ॥ तेजोसि ॥ २२ ॥
हिरण्यगर्भः सम् ॥ २३ ॥ अश्वस्तूपरः ॥ २४ ॥ शादन्दद्भिः ॥ २५ ॥ अग्निश्च ॥ २६ ॥ समास्त्वा ॥ २७ ॥
होतायक्षत् ॥ २८ ॥ समिद्धो अञ्जन् ॥ २९ ॥ देवसवितः ॥ ३० ॥ सहस्रशीर्षापुरुषः ॥ ३१ ॥ तदेव ॥ ३२ ॥ राम
अस्याजरासः ॥ ३३ ॥ यज्जाग्रतः ॥ ३४ ॥ अपेतः ॥ ३५ ॥ ऋचंवाचम् ॥ ३६ ॥ देवस्यत्वा ॥ ३७ ॥ देवस्य ॥ ११ ॥

दन्तोविरताश्च इति पठेयुरिति सिद्धं विरतोत्तरं पठनाभावात् ॥ तथाच कारिका शिष्याः पठेयुः सावित्रीं चतुष्कृत्वो
गुरुः स्वयं ॥ उपाकृतिवन्मन्त्रांश्च प्रणवं योजयेत्कविः ॥ १० ॥ सावित्रीं त्रिःसमुच्चार्यह्यध्यायांश्च प्रपाठकान् ॥ शत
स्थानान्यनुसृत्यकण्डिकाश्च तथान्तिमा ॥ ११ ॥ अन्तिमाः फक्किकाब्रूयादग्निमीळेपुरोहितं ॥ इषेत्वेत्यग्नआयाहि
शन्नोदेवीरभिष्टये ॥ १२ ॥ सहनोस्त्विति मन्त्रञ्च पश्चादुभाकवीति च ॥ ऋषिश्राद्धं ततः कृत्वा ब्राह्मणानां विसर्ज
नं ॥ १३ ॥ कारिकार्थः । प्राङ्मुखो गुरुः स्वयं ॥ ॐकारपूर्विकां सावित्रीं चतुःपठेत् ॥ प्रत्यङ्मुखोपविष्टाः ॥ शि
ष्यास्तद्वत्पठेयुः । सावित्रीपठनोत्तरमध्यायप्रपाठकशतांत्यकंडिकांत्यफक्किकाप्रतीकानि पठेयुः । नत्वाचारमूलं प्रतीक
पठनं ॥ किन्त्वध्यायादीन् प्रब्रूयादिति सूत्रे आदिशब्दस्य प्रतीकोपादानं व्याख्यातृभिर्व्याख्यातं ॥ युगपत्सर्ववेदोत्सर्ग
पक्षे ऋग्वेदोक्तान्यृषिमुखानि सामवेदोक्तानि पर्वाण्यथर्ववेदोक्तानि सूक्तानि पठेयुः ॥ तत्र सूत्रं ॥ क्षपणं प्रवचनं
च पूर्ववत् ॥ सूत्रार्थः ॥ प्रवचनमध्यायादिपठनं क्षपणमनध्ययनं पूर्ववत् ० ॥ उपाकर्मवदित्यर्थः ॥ अथाध्ययन

श॰ प॰ प्रजापतिर्ह वा इदमग्र एकएवास ॥ १४ ॥ महाहविषा ह वै देवा वृत्रं जघ्नुः ॥ १५ ॥ देवयजनं जोषयन्ते ॥ १६ ॥
॥ १२ ॥ दक्षिणेनाहवनीयं प्राचीनग्रीवे कृष्णाजिने उपस्तृणाति ॥ १७ ॥ सम्प्रपदान्यनुनिक्रामति ॥ १८ ॥ शिरो वै यज्ञस्याति
थ्यं वह्निप्रायणीयोदयनीयौ ॥ १९ ॥ तद्वा एष पूर्वार्ध्यो बर्हिष्ठः स्थूणराजो भवति ॥ २० ॥ उदरमेवास्य सदः ॥ २१ ॥
अग्निमादत्ते ॥ २२ ॥ तद्वै तत्सृष्टतो होता होतृषदन उपविशति ॥ २३ ॥ प्रजापतिर्वै प्रजाः ससृजानो रिरिचान
इवामन्यत ॥ २४ ॥ प्राणो ह वा अस्योपांशुः ॥ २५ ॥ चक्षुषी ह वा अस्य शुक्रामन्थिनौ ॥ २६ ॥ भक्षयित्वा समुपहू
ताः स्मद् इत्युक्त्वोत्तिष्ठति ॥ २७ ॥ मनो ह वा अस्य सविता ॥ २८ ॥ आदित्येन चरुणोदयनीयेन प्रचरति ॥ २९ ॥ प्रजा
पतिर्वा एष यदंशुः ॥ ३० ॥ देवाश्च वा असुराश्च ॥ ३१ ॥ अथ स्रुवञ्चाज्यविलापनीं चादाय ॥ ३२ ॥ अरण्योर
ग्नी समारोह्य ॥ ३३ ॥ केशवस्य पुरुषस्य ॥ ३४ ॥ आग्नेयोऽष्टाकपालः पुरोडाशो भवति ॥ ३५ ॥ असद्वा इदमग्र आ
सीत् ॥ ३६ ॥ प्रजापतिरग्निरूपाण्यभ्यध्यायत् ॥ ३७ ॥ एतद्ध देवा अब्रुवन् ॥ ३८ ॥ अथैनमतः खनत्येव ॥ ३९ ॥ राम ॥ १२ ॥

॥ ३८ ॥ स्वाहा प्राणेभ्यः ॥ ३९ ॥ ईशावास्यम् ॥ ४० ॥ इति संहिताध्यायाः ॥ अथ शतानि ॥ इषेत्वा ॥ १ ॥
परिते ॥ २ ॥ अग्नेनय ॥ ३ ॥ उपयामगृहीतोसिसुशर्मासि ॥ ४ ॥ प्रथमावाम् ॥ ५ ॥ सोमस्यत्विषिः ॥ ६ ॥ परस्या
अधि ॥ ७ ॥ अन्यावः ॥ ८ ॥ राक्षसि ॥ ९ ॥ नमोहिरण्यवाहवे ॥ १० ॥ इन्द्रेमम् ॥ ११ ॥ इमौते ॥ १२ ॥
अन्नात्परिस्रुतः ॥ १३ ॥ अश्विनातेजसा ॥ १४ ॥ पृथिव्यै स्वाहा ॥ १५ ॥ प्रजापतये च ॥ १६ ॥ तेऽस्य ॥
१७ ॥ तनूनपात्पथः ॥ १८ ॥ अयमिह ॥ १९ ॥ अनुनः ॥ २० ॥ इयत्यग्रे ॥ २१ ॥ हिरण्मये नशेषंपञ्चसप्त
तिः ॥ ७५ ॥ कण्डिकाः ॥ व्रतमुपैष्यन् ॥ १ ॥ सवैकपालान्येवान्यतर उपदधाति ॥ २ ॥ सवैस्रुचः संमार्ष्टि ॥
३ ॥ हिङ्कृत्यान्वाह ॥ ४ ॥ सवैप्रवराया श्रावयति ॥ ५ ॥ ऋतवोहवै देवेषु यज्ञे भागमीषिरे ॥ ६ ॥ सवैपर्णशाख
यावत्सानपाकरोति ॥ ७ ॥ मनवेहवैप्रातः ॥ ८ ॥ सयत्राह ॥ ९ ॥ ससयद्वाइतश्चेतश्चसम्भरति ॥ १० ॥ उद्धृ
त्याहवनीयम्पूर्णाहुतिं जुहोति ॥ ११ ॥ सूर्योहवा अग्निहोत्रं ॥ १२ ॥ अथहुतेग्निहोत्र उपतिष्ठते ॥ १३ ॥